# संस्कृत वार्ता:

दिनाङ्क : 10/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- संसदा बैङ्किङ्-व्यवस्थायाः आधुनिकीकरण-विधेयकं स्वीकृतम्।
- लोकसभया अधिकरण-परिष्कार-विधेयकं पारितम्।
- झारखण्डे परीक्षार्थिनाम् आन्दोलनं सप्तदश-दिवसं व्याप्य प्रचलति।
- अशेषे हि देशे ध्वज-यात्राणाम् आयोजनं वर्तते।
- चीन-देशे भीषणचक्रवातेन दश-लक्ष-जनाः स्थानान्तरिताः।

---------------------------------------------------------

<u>संसदा</u>

संसदा अद्य 'बैंकर्स् बुक्स् एविडेन्स् विधेयकं, विंशतिः षड्विंशतिः पारितं गतम्, यत् लोकसभानन्तरं राज्यसभया अपि स्वीकृतम्। वित्तमन्त्रिणा निर्मला-सीतारामन्-इत्यनया उपस्थापितेन विधेयकेन डिजिटल्-बैङ्किङ्-अभिलेखानां साक्ष्य-रूपेण विधिक-स्वीकार्यता सम्पुष्टा भवति।
इतः प्राक् नीट्-विषये विपक्षस्य कोलाहलेन राज्यसभायाः कार्याचरणं बहुवारं स्थगितम् अभवत् ।

---------------------------------------------------------

<u>लोकसभा-विधेयकम्</u>

लोकसभया अद्य अधिकरण-परिष्कार-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं ध्वनिमतेन पारितम्। विविधानाम् अधिकरणाध्यक्षाणां सदस्यानां च अर्हतासु, नियुक्तौ, सेवापक्षाश्रयेषु च पारदर्शिताम्, स्वायत्तताम्, एकरूपतां च आनेतुम्, अथ च तेषां कार्यप्रणाल्यां दक्षता-वर्धनम् अस्य विधेयकस्य मुख्योद्देश्यं वर्तते। अस्य विधेः अन्तर्गतम् एकस्य राष्ट्रियाधिकरण-आयोगस्य स्थापनायाः अपि प्रस्तावः वर्तते। नीट्परीक्षा-प्रकरणे प्रदर्शनरतानां छात्राणामुपरि आरक्षकाणां

कथित-कार्यचरणमवलम्ब्य विपक्षस्य कोलाहले विचार-विमर्शं विनैव एतत् विधेयकं पारितम् । पीठासीनाधिकारी जगदम्बिका पालः अवोचत् यत् संसदीय-कार्यमन्त्री किरेन रिजिजुः विपक्षस्य याचनां पूर्वमेव स्वीकृतवान्, अथ च केन्द्रीय-गृहमन्त्री अमित शाहः छात्र-प्रदर्शन-सम्बन्धे वक्तव्यं दातुं सन्नद्धः अस्ति। किन्तु अविरत-कोलाहलेन सङ्कुलं सदनम् अवलोक्य सभापतिना अद्य आदिनाय सदनस्य कार्याचरणं स्थगितम्। इतः पूर्वं अपराह्णे द्विवादने द्वितीयस्थघनानन्तरं यदा सदनस्य कार्याचरणं पुनरारब्धम्, तदा केन्द्रीय-विधि-न्यायमन्त्री अर्जुन राम मेघवालः विपक्षस्य गम्भीर-कोलाहले एव एतत् विधेयकम् उपस्थापितवान्। ततः पूर्वम्, मध्याह्ने द्वादशवादने प्रथम-स्थगनानन्तरं यदा सदनं समवेतम्, तदा कृष्णाङ्गारक-खननमन्त्री जी. किशन रेड्डी खनि-खनिज-संशोधन-विधेयकम् उपस्थापितवान् ।

---

## रिजिजूः

केन्द्रीय-मन्त्री किरेन रिजिजूः अद्य स्पष्टीकृतवान् यत् छात्र-प्रदर्शन-प्रकरणे संसदि चर्चां कर्तुं प्रशासनं तत्परम् अस्ति। कार्य-मन्त्रणा-समित्याः उपवेशनात् परं तेन विपक्षेण सह सदनस्य कार्यं निर्बाधं सञ्चालयितुं सविनयम् आह्वानं कृतम्, येन गृहमन्त्री अमित शाहः एतद्विषये आधिकारिकं वक्तव्यं प्रदातुं शक्नुयात्।

---

## प्रधानमन्त्री- राष्ट्रमण्डल-क्रीडा

प्रधानमन्त्री नरेन्द्र मोदी ह्यः नवदेहल्यां षड्विंशत्युत्तरद्विसहस्रतमवर्षस्य राष्ट्रमण्डल-क्रीडा पदकविजेतृभिः सह अमिलत्। तेन सप्रश्रयं समुदीरितं यत् वास्तविक-प्रतिष्ठा क्रीडा-भावेन एव लभ्यते।

स्कॉट्लैण्डस्य ग्लासगो-नगरे सम्पन्नासु एतासु स्पर्धासु भारतेन त्रयोदश स्वर्ण- सप्तदश-रजत-नव-कांस्य-पदकैः सह आहत्य एकोनचत्वारिंशत् पदकानि विजित्य चतुर्थं स्थानं लब्धम् ।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना 'खेलो इण्डिया' अभियानस्य विस्ताराय क्रीडकाः प्रोत्साहिताः। भारोत्तोलिका-मीराबाई-चानू-इत्यस्याः प्रशंसाम् कुर्वता तेन ससम्भ्रमम् प्रोदीरितं यत् क्रीडकानां

विजयः छात्राणां कृते महती प्रेरणा अस्ति। तेन अभाषि यत् राष्ट्रस्य क्रीडा-प्रगतिः केवलं सुविधामूला न भूत्वा समग्र-क्रीडा-संस्कृतेः निर्माणे आश्रिता अस्ति। अन्ते च प्रधानमन्त्रिणा सर्वेभ्यः क्रीडकेभ्यः शुभकामनाः प्रकटीकृताः।

-----------------------------------------------------------

<u>प्रधानमन्त्री-सिंहदिवसः</u>

विश्व-सिंह-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी अद्य न्यगादीत् यत् भारते एशियायी-सिंहानां सङ्ख्या निरन्तरं वर्धते, सहैव तेषाम् आवास-क्षेत्रमपि विस्तारं अवाप्नोति। केन्द्रीय-मन्त्रिणः भूपेन्द्र-यादवस्य एकं लेखं प्रकाशयन् श्रीमोदी प्रतिपादितवान् यत् वन्यजीव-संरक्षणाय सर्वकारस्य दृढ-सङ्कल्पः, जन-समुदायस्य बलिष्ठा सहभागिता च देशस्य वन्यजीवानां रक्षणाय अनुकरणीयम् उदाहरणमस्ति।

-----------------------------------------------------------

<u>झारखण्ड</u>

झारखण्ड-राज्ये जेएसएससी-सीजीएल-परीक्षायाः निरस्तीकरणाय सीबीआई-अन्वेषणाय च छात्र-आन्दोलनस्य अद्य सप्तदशं दिनम् अस्ति। राँची-नगरे विधान-सभां प्रति पदयात्रां-कुर्वत्सु छात्रेषु आरक्षक-बलेन जल-प्रक्षेपणास्त्रस्य प्रयोगः कृतः।

प्रशासनं पक्षतः उक्तं यत् छात्राणां याचनाः स्वीकृताः सन्ति, तथापि प्रदर्शनकारिणः छात्राः स्वस्य प्रमुख-याचनाः अधिकृत्य अद्यापि स्व-निर्णये दृढाः सन्ति।

-----------------------------------------------------------

<u>'हर घर तिरङ्गा'</u>

अशेषे हि देशे 'हर घर तिरङ्गा' इत्यभियानं सर्वत्र अत्यन्तम् उत्साहप्रदमं गतिं भजते, येन राष्ट्रिय-गौरवस्य ऐक्य-भावनायाः च सामूहिक-उत्सवे समाजस्य सर्वेषां वर्गाणां जनाः सहभागिनः भवन्ति। एतत् अभियानं अस्य-मासस्य सप्तदश-दिनाङ्कं यावत् प्रचलिष्यति, यत्

अस्मिन् वर्षे 'वन्दे मातरम्' राष्ट्रगीतस्य सार्ध-शतवार्षिकी-समारोहेण सह संपद्यते, येन सर्वस्य देशभक्तस्य हृदयम् अत्यन्तं प्रमुदितम् अस्ति। प्रधानमन्त्री नरेन्द्र मोदी विकसित-भारतस्य सङ्कल्प-पूर्त्यै अस्मिन् अभियाने जन-सहभागितायै आह्वानम् अकरोत्।

केन्द्रीय-गृहमन्त्रिणा अमित-शाहेन देशवासिनः ध्वज-यात्रा-माध्यमेन 'वन्दे मातरम्'-गानेन च एतं राष्ट्रिय-महोत्सवं संवर्धयितुम् आग्रहो विहितः। सहैव असौ स्व-गृहेषु राष्ट्रध्वजम् उत्तोल्य harghartiranga.com जालपुटे 'सेल्फी' इति आत्मचित्रं प्रेषयितुम् अपि आहूतवान्।

जम्मू-कश्मीर-राज्यस्य सर्वेषु जनपदेषु ध्वज-यात्राः देशभक्ति-पूर्ण-कार्यक्रमाश्च आयोज्यन्ते, यत्र जन-सामान्यैः सह शैक्षणिक-संस्थानां सर्वकारीय-कार्यालयैः च राष्ट्रध्वजः प्रदर्शितः। बिहारस्य राजधानी-पटना-नगरे मुख्यमन्त्रिणः सम्राट्-चौधरी इत्यस्य नेतृत्वे जेपी-सर्कल-तः कारगिल-चौक-पर्यन्तं दिव्या ध्वज-यात्रा समायोजिता, यस्यां बहवः छात्राः सामान्य-जनाश्च सम्भूय भागम् अगृह्णन्। नागालैण्ड-राज्यस्य कोहिमा-नगरे उच्चशिक्षा-पर्यटन-मन्त्री तेम्जेन्-इम्ना-आलोङ्ग्-वर्येण द्विचक्रिका-ध्वज-यात्रा समायोजिता।

---

**चीन-चक्रवातः**

चीन-देशे डॉल्फिन्-चक्रवातस्य सम्पातानन्तरं शङ्घाई-नगरम् समेत्य पूर्व-चीन-क्षेत्रात् दशलक्षाधिकाः जना: सुरक्षित-स्थानेषु प्रापिताः। अनेन चक्रवातेन सम्पूर्णे क्षेत्रे भीषण-वृष्टिः अजायत, येन यातायात-सौविध्यम् अबाधत। अत्रावधेयं यत् अद्य शङ्घाई-नगरे प्रायः सहस्राधिकाः विमानसेवाः निरस्ताः। एतदतिरिच्य शांडोंग-हेनान- हुबेई-अनहुई-जियांगसू-झेजियांग-प्रान्तेषु अतीव तीव्रवृष्टेः पूर्वसूचना प्रदत्ता । शङ्घाई-नगरेऽपि अतितीव्र-वृष्टेः सम्भावना वर्त्तते। प्रशासनेन जनाः बाह्यगतिविधीन् परिहर्तुं निर्दिष्टाः । चीन-प्रशासनेन पूर्वमेव एतदर्थं रक्तवर्णीया सञ्चेतना उद्घोषिता आसीत्।

।। इति वार्ता: ।।